NyāySiA. 189. 1; प्रतियोगितदभावयोः सहावृत्त्या भ्रमप्रत्यवाययोरनुत्पत्तिप्रसङ्गः AdvaiSi. 445. 9; न हि च चक्षुर्ज्ञानकाले श्रोत्रज्ञानोत्पत्तिरुपलभ्यते । न च आवृतत्वात्तदा तदनुत्पत्तिः, स्वसमयेऽपि अनुत्पत्तिप्रसङ्गात् JñānBiPra. 35.3; **ii** undesired contingency of non-emergence कार्यान्तराभावात्तर्हि द्वयानुत्पत्तिप्रसङ्गः स्यात् Sphuṭā. i. 47.22 (*on* 1.19); प्रागसच्चेत् कार्यं पश्चादपि शशविषाणवदनुत्पत्तिप्रसङ्गः NyāyPari. 348.13; **iii** undesired contingency of non-application (of a grammatical element in the formative process) वाचके तु प्रत्ययेऽर्थप्रयुक्तत्वाच्छब्दस्यैकेनैवाभिहितेऽर्थे द्वितीयस्यानुत्पत्तिप्रसङ्गः Pradī. iv. 27A.15 (*on* iv. 1. 3) न चैवं योऽत्र धातुस्तस्मादनुत्पत्तिप्रसङ्गः, तस्यापि कर्मत्वात् PadMañ. *on* KāśiVṛ. *on* P. iii. 1.7.

**अनुत्पत्तिमत्** (an-utpattima(n)t) *adj.* not having origination वियदनुत्पत्तिमद्विभुत्वात् TattvPrakā. 107A. 12 (*on* ii. 3.1)

**अनुत्पत्तिमत्त्व** (anutpattimat-tva) *n.* the state of being that which does not have origination स्यादेवैकस्योत्पत्तिमत्त्वमनुत्पत्तिमत्त्वम् BrahmSūBh. (Ma.) 32A.5 (*on* ii. 3.5); TattvPrakā. 108A. 9 (*on* ii. 3. 5); हेत्वभावादनुत्पत्तिमत्त्वं यत्तु निगद्यते TarkSaṁ.(Ā.) 125. 8.

**अनुत्पत्तिमत्त्वप्रसङ्ग** (anutpattimattva-prasaṅga) *m.* undesired contingency of being that which does not have origination किं घटादिविषयप्रकाशात्मिकाया एव संविद उत्पत्तिः प्रतिक्षिप्यते । उत सकलविषयविरक्तायाः कस्याश्चिदन्यस्याः । नाद्यः, घटादीनामप्यनुत्पत्तिमत्त्वप्रसङ्गात् ŚatDū. 112.21.

**अनुत्पत्तिमात्र** (anutpatti-mātra) *n.* mere non-arising मिथ्याज्ञानं वै खलु मोहो न तत्त्वज्ञानस्यानुत्पत्तिमात्रम् NyāyBh. 287. 7 (*on* iv. 2. 1); सपक्षे गगनादावनुत्पत्तिमात्रस्यैव व्याप्यत्वनिश्चयात् Kiraṇā. 101. 14; असंभवस्तु सतोऽनुपपत्तेः ··· असंभव इत्यनुत्पत्तिमात्रप्रतिज्ञानात् NyāySu.(Ja.) 434B. 8 (*on* ii. 3. 3)

**अनुत्पत्तिरूप** (anutpatti-rūpa) *adj.* **i** of the form of non-arising (अभावस्य) न चानुत्पत्तिरूपस्य कारणापेक्षिता क्वचित् ŚlokaVār. 5(9). 44 (488. 10); **ii** having the nature of non-emergence अनुत्पत्तिरूपहेत्वसिद्धया विकारान्तरनिरासोऽनुपपन्नः ŚrutaPra. iA. 141. 16 (*on* i. 1. 1)

**अनुत्पत्तिलक्षण** (anutpatti-lakṣaṇa) *adj.* characterised by non-arising (of knowledge) प्रमाणम् ···। तत् खलूत्पत्तिदशामधिरूढमिति न तावदनुत्पत्तिलक्षणेनाप्रामाण्येन परिभूयते Kāśi. i. 106. 20 (*on* 2. 87); iii. 133.14 (*on* 5(5).102); iii. 186.26 (*on* 5(7). 84); प्रमितावनपेक्षत्वेऽप्युत्पत्तौ प्रत्यक्षापेक्षत्वात् तद्विरोधादनुत्पत्तिलक्षणमप्रामाण्यम् Bhām. 5. 11 (*on* i.1. 1); ज्ञानोदयादेवानुत्पत्तिलक्षणस्याप्रामाण्यस्यासिद्धेः ŚatDū. 95.6; 170.29; एतेनानुत्पत्तिलक्षणमप्रामाण्यं निराकृतम् YuktiSneha. 44.27 (*on* i. 1. 1)

**अनुत्पत्तिलिङ्ग** (anutpatti-liṅga) *n.* force of (the statement of) non-origination सृष्टिप्रागभावरूपादनुत्पत्तिलिङ्गादेतस्माज्जायत इत्याद्युत्पत्तिश्रुतेः प्रबलत्वात् ŚivārkaMaDī. ii. 167.15 (*on* ii. 4.2)

**अनुत्पत्तिलिङ्गत्व** (anutpattiliṅga-tva) *n.* the state of having the inference of non-appearance or non-functioning पूर्वमनवस्थाप्रसङ्गेनानुत्पत्तिलिङ्गत्वं निराकृतम् NyāyRa. 490. 7 (*on* 5(8).49)

**अनुत्पत्तिवादिनी** (anutpattivād-inī) *adj.* (*f.*) advocating non-origination अनुत्पत्तिश्रुतिस्तु सर्वात्मनानुत्पत्तिवादिनी TattvPrakā. 110A.2 (*on* ii. 3. 9)

**अनुत्पत्तिविधि** (an-utpattividhi) *m.* other than the injunction of origination न ह्यनुत्पत्तिविधयोऽनेकार्थव्यापृतिक्षमाः ŚāstrDī. 396. 15 (*on* iv. 4.3)

**अनुत्पत्तिविनाशधर्मत्व** (anutpattivināśadharma-tva) *n.* the state of not having the properties of either origination or perishability 'नासतो विद्यते भाव' इति तु ··· आत्ममात्रस्यानुत्पत्तिविनाशधर्मत्वप्रतिपादकम् BhāṭṭCin. i. 40.19 (*on* i. 1. 4)

**अनुत्पत्तिविनाशधर्मन्** (an-utpattivināśadharman) *adj.* not having the properties of either origination or perishability नन्वनुवृत्ता नित्यानुत्पत्तिविनाशधर्मा च जातिः विपरीतस्वभावा च व्यक्तिः ŚāstrDī. 101.26 (*on* i. 1.5)

**अनुत्पत्तिशङ्का** (anutpatti-śaṅkā) *f.* doubt regarding non-origination अश्रुतोत्पत्तिकानामनुत्पत्तिशङ्कानिरासोऽधिकरणार्थं इत्युच्यते VedāntKa. 313.4 (*on* ii. 3. 9)

**अनुत्पत्तिश्रुति** (anutpatti-śruti) *f.* scriptural statement regarding non-birth or non-origination आत्मनोऽप्यनुत्पत्तिश्रुतेरेव नित्यत्वम् VedāntDī. 116.12 (*on* ii. 3. 1); अनुत्पत्तिश्रुतेः ··· जीवोत्पत्तिः प्रतिषिध्यते VedāntDī. 121. 18 (*on* ii. 3. 18); ब्रह्मण आकाशस्रष्टृत्वप्रतिपादकसमन्वयस्यानुत्पत्तिश्रुतिविरोधो नास्ति PrakaVi. 597.23; अनुत्पत्तिश्रुतेर्भाक्तत्ववर्णनं च परास्तम् TattvPrakā. 107B. 1 (*on* ii. 3. 1); उत्पत्त्यनुत्पत्तिश्रुत्योर्विरोधोऽप्याकाशद्वैतमवगमयति NyāySu. (Ja.) 433A. 7 (*on* ii. 3.1); 433B. 9 (*on* ii. 3. 2)

**अनुत्पत्तिसम** (anutpatti-sama) *m.* name of a futile rejoinder (*lit.* parity per non-generation) प्रागुत्पत्तेः कारणाभावादनुत्पत्तिसमः NyāySū. v. 1.12; अनुत्पत्त्या प्रत्यवस्थानमनुत्पत्तिसमः NyāyVār. 544. 12 (*on* v. 1. 12); NyāyMañ. ii. 179. 32; अनुत्पन्ने साधनाङ्गे हेतुवृत्तेरभावतः । भागासिद्धिः प्रसङ्गः स्यादनुत्पत्तिसमो मतः TārkiRa. 278.10 [method of arguing against a thing by attempting to prove that nothing exists from which it could spring, MW.; Apte]

**अनुत्पत्तिसमा** (anutpatti-samā) *f.* name of a futile rejoinder (*lit.* parity per non-generation) अनुत्पत्त्या प्रत्यवस्थानमनुत्पत्तिसमा जातिः PramāMī. 61.1 (*on* ii. 1. 29)

**अनुत्पत्तिसमातस्** (anutpattisamā-tas) *adv.* from the futile rejoinder called *anutpattisamā* (*lit.* parity per non-generation) अर्थापत्तिसमाया अनुत्पत्तिसमातो भेदो दर्शितः इहानुत्पन्नैरहेतुभिः साम्येन कार्यप्रतिषेधात् TātpaṬ.(Vā.) 680. 14 (*on* v. 1. 13)

**अनुत्पत्तुम्** (an-utpattum) *inf.* not to originate उपसर्पणप्रत्ययाधीनपरस्परसंनिधानोत्पादा नानुत्पत्तुं नाप्यसंनिधातुमीशते Bhām. 421. 16 (*on* ii. 2.19)

**अनुत्पत्त्यतिदेश** (anutpatty-atideśa) *m.* extended application of non-birth जीववदनुत्पत्त्यतिदेशे सिद्धान्तविरोधात् ŚrutaPra. ii. 389.28 (*on* ii. 4.3)

**अनुत्पत्त्यनुपपत्ति** (anutpatty-anupapatti) *f.* untenability of non-origination प्रमाणविरोधेन वायोरेवानुत्पत्त्यनुपपत्तेः TattvPrakā. 109A. 13 (*on* ii. 3. 8)

**अनुत्पत्त्यनुमान** (anutpatty-anumāna) *n.* inference regarding non-origination न च श्रुतिप्रतिपन्नेऽर्थे तद्विरोधि निरवयवत्वादिहेतुकमनुत्पत्त्यनुमानमुद्धेतुमलम् BrahmSūBh.(Rā.) 514. 5 (*on* ii. 3. 2); VedāntDī. 116.11 (*on* ii. 3. 1)

**अनुत्पत्त्यर्थम्** (anutpattyartham) *adv.* for the sake of non-application or non-appearance (of a grammatical element in the derivative process) वावचने चानुत्पत्त्यर्थम् Vār. 7 *on* P. iii. 1. 2; टाप्प्रतिषेधार्थमिति । टापोऽनुत्पत्त्यर्थमित्यर्थः Pradī. vi. 36. 12 (*on* vii. 1. 33)

**अनुत्पत्त्यवगम** (anutpatty-avagama) *m.* notion of non-origination श्रुत्या चोत्पत्तौ प्रतिपन्नायामनुत्पत्त्यवगमोऽन्यथा निर्वाह्यः ŚrutaPra. ii. 394. 23 (*on* ii. 4. 7)

**अनुत्पत्त्यविनाशधर्मन्** (anutpattyavināśa-dharman) *adj.* having the properties of non-origination and imperishability प्राच्यो मृत्पिण्डसंनिवेश इति चेत् । स वा किमुपरिष्टान्न भविष्यति, यन्न घटमावरिष्यति । हन्त सोऽप्यनुत्पत्त्यविनाशधर्मा सद्रादिभिरिष्यते Kāśi. i. 83. 2 (*on* 2.35)

**अनुत्पत्त्यसाधकत्व** (anutpattyasādhaka-tva) *n.* the state of being that which does not prove non-origination किमश्रुतेरिति हेतुः सार्वत्रिक उतैकदेशपरः ।··· नान्त्यः । अनुत्पत्त्यसाधकत्वात् VedāntKa. 308. 12 (*on* ii. 3.1)

**अनुत्पत्त्यादिपर्यायप्रागभावादि** (anutpattyādiparyāya-prāgabhāvādi) *adj.* prior non-existence etc. synonymous with non-origination as yet (implying future origination) etc. भावत्वसामान्यमेवानुत्पत्त्यादिपर्यायप्रागभावादिरूषितं वस्तुरूपं सामान्यम् NyāyRa. 569. 10 (*on* 5(13). 11); YuktiSneha. 104.7 (*on* i. 1. 5)

**अनुत्पत्त्यादिरूषिता** (anutpattyādi-rūṣitā) *adj.* (*f.*) qualified by non-origination etc. सत्तैव ह्यत्र सामान्यमनुत्पत्त्यादिरूषिता ŚlokaVār. 5(13).11 (569. 2)

**अनुत्पत्त्याधारत्व** (anutpattyādhāra-tva) *n.* the state of being that which is not the substratum of origination न तु कोशी तस्य प्रकृतिरिति । अतत्कारणत्वादनुत्पत्त्याधारत्वाच्च PadMañ. *on* KāśiVṛ. *on* P. v. 1. 12.

**अनुत्पत्त्याधारभूतत्व** (anutpattyādhārabhūta-tva) *n.* the state of being that which is not the substratum of origination न तु कोशी तस्य प्रकृतिरिति ।··· अनुत्पत्त्याधारभूतत्वात् Nyās. ii. 12. 16 (*on* v. 1. 12)

**अनुत्पत्त्यापत्ति** (anutpatty-āpatti) *f.* **1** undesired contingency of non-emergence कार्यतावच्छेदकमतिप्रसक्तमुक्तम् । तत्त्वयुक्तम् । तथा सति स्वर्गत्वावच्छिन्नस्याग्निहोत्राज्ज्योतिष्टोमरूपकारणाभावादनुत्पत्त्यापत्तेः VaiyāBhū. 86.14 (*on* 22); **2** undesired contingency of non-application or non-appearance (of a grammatical element in the derivative process) यत्तु 'दन्तोष्ठादि समुदितं स्थानम्' इति, तन्न, शिक्षायां 'दन्त्योष्ठ्यः' ··· इत्यादौ 'तत्र भवः' इत्यधिकारविहितयतः प्रत्येकमनुत्पत्त्यापत्तेः LaŚabdeŚe. i. 30.27.

**अनुत्पत्त्युपपत्ति** (anutpatty-upapatti) *f.* tenability of non-appearance घ्राणे च सति तदभावादेवानुत्पत्त्युपपत्तेरलं शक्तिकल्पनया ŚāstrDī. 80.8